श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ रघुवीर सुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ रघुवीर सुप्रभातम् ॥

बुध्यस्व वत्स तव विक्रमकाल एष
याागान्तराय करणाय नभोन्तरालात्।
सिद्धाश्रमस्य सविधे बहुधा पतन्ति
रक्षोगणा रघुपते! तव सुप्रभातम्॥ १ ॥

आरोहणाय तव पादयुगेन मूर्ध्ना
बिभ्राण एष भरतो मणिपादुके द्वे।
निर्वर्त्य सान्ध्यविधिमद्य पुरोहितेन
त्वामीक्षते रघुपते! तव सुप्रभातम्॥ २ ॥

श्रीदण्डकावन तपोधन पुङ्गवास्त्वां
त्रातारमाश्रितवतां शरणं प्रपन्नाः।
बाधाशतात्प्रचकिता मुहुरद्य रक्षो-
यूथाहिताद्रघुपते! तव सुप्रभातम्॥ ३ ॥

सम्प्राप्य वालिमथनस्य तवाभ्यनुज्ञां
सिंहासनं समधिरोढुमनास्तदीयम्।
सुग्रीव एष शिरसा चरणौ नतस्ते
बद्धाञ्जली रघुपते! तव सुप्रभातम्॥ ४ ॥

श्रोत्रद्वये तव दशास्यपुरे प्रदृष्टा
सीतेति सुप्रियवचोऽमृतवर्षणाय।
सम्प्राप्त एष हनुमान् कृतकार्यवर्गो
यूथैस्समं रघुपते! तव सुप्रभातम्॥ ५ ॥

दुष्टे हते दशमुखे भवतः स्वरूप-
याथार्थ्य बोधन कृते सकलस्य जन्तोः।

www.prapatti.com

ब्रह्मेश मुख्य विबुधप्रवराः समेताः
सेवार्थिनो रघुपते ! तव सुप्रभातम्॥ ६ ॥

मेध्याश्वमेधसमयेऽत्र तवाङ्घ्रियुग्मे
वाल्मीकिरेष भगवान् जगतां हिताय।
सीतां सतीं कुशलवौ च समर्पयिष्यन्
प्रेम्णागतो रघुपते ! तव सुप्रभातम्॥ ७ ॥

वाल्मीकिरामायण सप्तकाण्ड
सारार्थ रत्नावळि हृद्यमेतत्।
श्रीसुप्रभातं प्रपठन्ति येऽत्र
ते सप्तलोकीमतियन्ति चान्ते॥ ८ ॥

॥ इति रघुवीर सुप्रभातं समाप्तं ॥

www.prapatti.com